Shri Raghunath Temple MSS. Library,
JAMMU

No. १४४२

Title चिन्तामणौ उपमान विवेकः

Author म॰ म॰ पक्षधरः

Extent २ Age ×

Subject न्याय वैशेषिकं

चिन्तामणौ उपमान विवेकः

१४४२

न्याय

श्लो° ३००

॥६०॥ ॐ नमो गणेशाय॥ संज्ञासंज्ञिपरिच्छेदसंभवः प्रथमं यतः। समानमुपमानेन नमामि तमहं हरिं॥१॥ शिष्या
वधानाय प्रतिजानीते॥ अथेति। अनुमाननिरूपणानंतर[illegible]मित्यर्थः। उपमानस्य शाब्दशक्तिग्राहकतयोपजीव्यत
त्ति शाब्दात्प्रागुपमाननिरूपणमिति भावः। यद्वा शाब्दस्य पृथक्प्रामाण्ये विप्रतिपत्तिरुपमानस्य तु स्वरूपेपि
तिगुरुविप्रतिपत्तिकतया प्रथममुपमानं निरूप्यते। अक्लिष्टो हि गुरुर्निरूपयितुं शक्नोतीति भावः। जरन्मीमांस
कमतमाह। तत्रेति। उपमाने निरूपणीये फलभेदः करणभेदः प्रयोजकत्रयाऽवश्यं विवेचनीय इति लाघवा
न्मुखं लक्षणमाह॥ सादृश्येति। ननु सादृश्यं सामान्यमेव तच्च योग्यमिंद्रियेणायोग्यमनुमानशाब्दाभ्यां प्र
प५ तीयत इति फलविशेषाभावान्नातिरिक्तं भिन्नमुपमानमित्यत आह॥ सादृश्यमिति। तत्र यथेंद्रियादिना ग्र
वर्तते तथा दर्शयिष्यत इति भावः। ननु सादृश्यमेव नास्ति कस्य पदार्थांतरताभावादित्यत आह। तथाहीति॥
ननु सादृश्यं प्रतिपदार्थमेकमनेकं वा न संभवति वक्ष्यमाणदूषणादिति सादृश्यव्यवहारो बाधितविषय
इति न तत्र तत्सिद्धिरित्यतस्तत्स्थापयितुमाह। तच्चेति। ननु वस्तुत्वादिना नैतदनिष्टमित्यपरितोषादाह किंचेति १
न त्विष्टापत्तिः गगनं गगनाकारमित्यादिदर्शनात्। न चैवं सोऽयमित्यत्र तत्सदृश इति प्रयोगापत्तिः धेनुपदे गोत्वस्य

वनेदस्यात्रइयोगोपाधित्वादित्यरितोषादाह। स्वसदृशेति। तद्धीः सुसदृशामंदसदृशाधीः। नन्वेनकेचेपिप्रति
योगिनियमोनस्यादितिसर्वस्यसादृश्यापत्तिरिति अतोविशिनष्टि। व्यासज्येति। तथाचगवये व्यासज्यवृत्ती
तितयोरेवपरस्परंसदृशव्यवहारोयथा संयोगाश्रययोरेवसंयुक्तव्यवहार इत्यर्थः। नन्वेवं द्रव्यसाद
श्यमपिनेकमित्यत आह॥ सत्तेति। ननुसादृश्यातिरेकवादिपक्षे तेषां किं संख्यावपिसप्तपदार्थात्तिन्नयम दा ५
स्तीतिकथमेतदित्यत आह। जातीति। नित्यत्वेसतिअनेकसमवेतत्वंजातेरेकमात्रसमवेतत्वेसत्यसमवायि
त्वंविशेषस्यलक्षणं। तद्वदनुगतमितिव्युत्पत्तिप्रयोजकंयथातथासादृश्यत्रिन्नाष्टत्विचसतिवृत्तित्वंसा
दृश्यलक्षणं। ततएवतयोरूपपत्तिरित्यर्थः। गुणेति। गुणवृत्तित्वाकर्मवृत्तित्वाछेत्यर्थः। नवेति। नचगुणेक
र्मणिवासादृश्यमित्यर्थः। तत्रगुणेकर्मणिचेत्यर्थः। तत्ततीतेः सादृश्यव्यवहारादित्यर्थः। अतएवे
त्यस्यप्रत्यवमर्षणीयमाह। बाधकाभावादिति। ननु नयत्र सादृश्यकल्पनेगौरवंबाधकमित्यतआ
ह। भिन्नेति। भिन्नत्वंयत्स्वधर्मेसामान्येमसाधारणोधर्मत्वेनव्यक्तमिति। नाभेदेतदापत्तिरित्यर्थः। अत्र
विजातीयत्वेसतीति सामान्यविशेषणंसादृश्यस्यविशेषणं वाअग्राह्यंसिद्धिः। नहिसामान्येवैजात्य
संभवः। अंत्येचानन्वयः। किंच। अवयवादिगतसामान्यस्यसादृश्यत्वे अवयवविघटेघटत्वेनसादृश्यप्रत्य

२

यत्नमः स्यात्तत्र तद्गतो वादिति यद्यपि तथापि विजातीयाश्च व्यवच्छेदस्य सामान्यगुणावच्छेदकमस्तित्वं साहचर्य
मिति विवक्षितमिति । विजातीयत्वेन न साजात्यमालोको विवक्षितो विरुद्धजातिमत्त्वं वा अहो साजात्येपीति धू
अंत्यैः व्यवादीति विकल्पयोऽप्यं । अन्यथा यमजयोरेकत्राचादि विरुद्धजातिमत्त्वाद्दोष एव न स्यादिति
भावः । अव्याप्तिमुक्त्वातिव्याप्तिमाह । विसदृशयोरिति । गुणादावतिव्याप्तिमुद्धर्तुमाह । नापीति । कपिंज
लोनालजे तेस्तत्र यथा त्रिचतुरपर्यवसन्नं बहुत्वं च नं तथात्रापि त्रित्वाविश्रान्तं बहुत्वमित्यर्थः । कपिंजलागो
र त्रित्रिति । अननुगमादिति । स्योक्तं वृद्धसंमतिमाह । तदुक्तमिति । कश्चिद्द्रव्ययमंतर्गोच्यं साहचर्यं यथा कपा
लयोर्घटे कश्चिद्विशिष्टतायगुणकर्मणोः साहचर्यं यथावलोभयोर्वेगकर्मणोः साहचर्यमित्यत्र साहचर्यवि
त्रतोऽवच्छिन्नमननुगमइत्यर्थः । उक्तेनेदमेवाह धर्मेतरइति । धर्मत्वाद्धर्मो द्विजातिगुणादिः कस्य चिदेक नि
नं उ सर्वस्येत्यर्थः । अंतराकिंयंति लक्षणानिदूषयित्वा सिंहावलोकनक्रमेण विजातीयेचेत्यसतीस्य
लक्षणदोषांतरमाह । किंचेति । यद्वा धर्मव्याकुलत्वं सामान्यव्याकुलत्वमेव परंतु तो नावेनाह । किंचेति । अतः ॰ २
लतल्लक्षणसामान्यपदत्तावपि न दोषः । तदनिरूप्यंइति यागमनिरूप्यं । तद्धीरिति । प्रतियोगिधीरित्यर्थः ।
किंचेत्यादि दोषद्वयं निरस्यति । नदस्येत्यादिना । नन्वेवं नेदसती तित्यज्यतामित्यत आह । अपिचेति । संक

२

रएकं। तन्नायास्तद्घटायामप्यान्नेदमाह। एवमिति। अतिरिक्तमिति। नावच्छेदकतीयतद्वृत्त्यभावत्वं का
नास्त्येवेति नावः। ननु साहचर्यमभावो नावो वा आद्ये ऽभावः। अन्त्ये सगुणं निर्गुणं वा आद्ये घटद्वये अन्त्ये तेना
श्रितमाश्रितं वा आद्ये समवायः। अन्ते एकाश्रितमनेकाश्रितं वा आद्ये विशेषः। अन्ते सामान्यवन्निःस
मान्यं वा अन्ते सामान्यं आद्ये स्पंदो वा ऽस्पंदो वा आद्ये विरोधः। न हि स्पंदो नेकाश्रितः। तथा द्वे वा कर्मैव। अन्ते स
गुण एव साहचर्यं स्यादित्यत आह। यथायथमिति। द्रव्यादिषट्कसाहचर्यव्यवहारस्योपपादयितुमश
त्वात् तद्भिन्नं साहचर्यमन्यथा सामान्यादिकमपि नातिरिक्तं सिध्येदेवं परिशेषयितुं तस्यापि शक्यत्वा
दित्याह। तन्नेति। असाधारणान्यतेति। ननु चानेदत्तिव्याप्तिर्न घटतज्ञोत्वान्यज्ञोगतवक्तृधर्मवत्त्वेन
तज्ञोरिति एवं चासाधारणान्यत्वपक्षमपीति चेत्। न। असाधारणान्यत्पत्र असाधारणधर्मानिन्नत्वं परि
गृह्यते साधारणधर्मशून्यत्वं विवक्षितमिति गम्यः। र। ते तथा चासाधारणधर्मशून्यत्वे सति तज्ञतवक्तृधर्मवान्तत्सह
ज्ञात्यर्थः। वक्तृपदं चात्र न कपरं तेन साधारसाधनं चरमामात्रगत्यनिष्ठमानिधरेनेना विरोधः। तस्मात्सहचार इति
प्रगुक्तमुद्धरति। नेदाघटितत्वादिति। ननु साधारणान्यत्वन्नान्यपदार्थं नेदप्रवेशान्नैवमिति वाच्यं। एवं
स्वरूपनेदविवक्षातत्रैवावधित्वं यथा वाराणसीतः प्रयागनगरीति। नच नवान्या नावविवक्षायामपि घटो

२ नपटइत्यत्रापितदापत्तेरिति। नन्वेवंसादृश्यंसप्रतियोगिकंनस्यात्। अवधेरेवप्रतियोगित्वादित्यतआह। तद्भेतेति।
बहुत्वंचेति। तथाप्यनेकत्वेनैवानुगमइत्यर्थः॥ चंद्रइवेति। ननुचंद्रपदार्थः सदृशो वा सादृश्यं वा। आद्ये चंद्रसदृशं
मुखमिति वा कथंस्यात्। द्वितीयेपि चंद्रः सादृश्यं मुखमिति स्यात्। तुन्यथाप्यनन्वयः॥ चंद्रेणसदृशं चंद्रस्यसदृ
दृशमिति वान्वयाभावात्। तृतीयार्थस्य षष्ठ्यर्थस्य वा उपस्थापकाभावेनानुपस्थितेः। सुब्धातिपदिकार्थएव प्रथमायाः प ४
साधुत्वादिति चेत्। न। प्रथमायाएव तृतीयार्थोपस्थापकत्वात्। अत्र हि तृतीयार्थएव षष्ठ्यर्थे वा प्रथमा। कथमन्यथाद्य
तोनेत्यत्र घटस्य प्रतियोगित्वरूपसंबंधलाभः॥ कथं वा ग्रासादात्प्रत्ये तरत्यत्र ग्रासादस्य कर्मत्वलाभः॥ तथा च यथा तत्र
कर्मत्वे पंचमी। यथा प्रतियोगित्वे प्रथमा तथात्रापि सादृश्यनिरूपकत्वे प्रथमा। सुखीस्तु कर्मत्वकरणत्वादिमन्यत्व
मात्रमिति नस्सूत्रविरोधः। अपिन्यायसिद्धार्थानुवादकत्वात्सूत्रस्येति भावः। उक्तंचरुश्चरत्वादिकं। साध्येति। तथा च
३ बहुधर्मवत्त्वमित्यत्र बहुपदमनेकमात्रपरं। मुखत्वमुखत्ववत्त्वमित्यर्थः। नन्वेवं सर्वस्य सर्वसदृशंस्यादित्यतआह।
धर्मेति। अत्रापीति। सादृश्यव्यंजकोपि सादृश्यव्याप्यत्वमित्यर्थः। अनुनवविरोधस्यदिति। नहि तत्र निसांसादृश्यमनु
भूयत इत्यर्थः। तद्भेतेति। तथा चावच्छेदकत्वात्तदेव सादृश्यमस्तु किमधिकेनेति भावः। तस्यापीति। तत्पदवाक्यनि ३
रूप्यतयेति भावः। नन्वेवं यद्भेदत्वे सायं देवदत्त इति ज्ञाते तत्र त्वमिति ज्ञानं न स्यात् किंतु तद्भेदयमिति स्यादित्यत
आह। नेदंतासमानइति।

नन्वेवमिति। तस्मिंस्तद्धर्मवत्तायास्तद्वत्ताच इत्यर्थः। एकचेति। यद्यपि धवं छिंधि खदिरं छिंधि इत्यादौ नैकस्यां छिदायां द्व-
योरन्वयः। छिदा भेदात्समुच्चयश्च। तत्रापि इतिस्यादित्य लक्षणायां तथाप्यनपगतत्वेऽपि धर्मवत्त्वस्यान्यत्र ग्रह साहचर्य-
धीरत्वधायाश्च समुच्चय इत्येव विवक्षितमिति भावः॥ नवीना इति॥ मीमांसका इत्यर्थः। जातेरनाश्रय हेतेनेति। न चासम-
वत्वेन घटत्वादिरिवावस्थानमिति वाच्यं। तदनभ्युपगमादिति भावादिति भावः। नापीति। गुणस्य तदनाश्रयत्वादित्य-
भायः। न हि तदयमात्र वृत्तिर्जातिर्जात्यं धर्मांतरं वा सुखत्वाद्यतिप्रसक्तमिति। तवापीति। तथा चात्वयके ते नैवान्यथा-
सिद्धिरिति भावः। इय्ये तथेति। समानधर्मवत्वं व्यंजकं विनातत्सादृश्यावगतिरित्यर्थः। व्यतिचारादिति। उक्तसुखद्वय-
इति भावः। प्रलयपीति। प्रलयमस्य प्रामाणिकत्वादभ्युपगममिति भावः। तथा चेति। समानदेशानांसमानेंद्रियग्राह्याणां
तत्त्वाति नियतव्यंजकत्वं व्यापकत्वं चमित्यतान्यव्यंजकत्वमित्यर्थः। तदेवेति। गोत्वं ह्यखंड तया लाघवेन सिध्यतीति
भावः। वैसादृश्यमपि पदार्थांतरमिति भावः। तद्धीति। गोरिव मस्त्रिषीत्यत्रेत्यर्थः। क्षीरत्वादिनेति। अयास्तक्षीरवचेन-
त्यर्थः। सपाट क्षीरवत्वादिनेति सुगमः पाठः। नन्वेवमुपमानपदमितरव्यवच्छेदकं स्यात् तत्रव्युत्पत्तिविरोधश्च
त्यतआह। यद्वेति। नन्विति। यद्यपि असाधारणान्यत्वत्र भेदास्तत्वान्नास्तीति तत्फलं दूषणमसंगतं तथाप्यसाधारणध-
र्मशून्यत्वे च भेदनियतमिति भेदसमये असाधारणधर्मशून्यत्व संचारप्रापीति फलतो न विरोध इति भावः। एकदेश इति।
लक्षणतयेत्यर्थ इति भावः। अत एव लक्षणाबीजमनुपपत्तिमाह। कथमिति। नवात्रेति। ऐसरवायं न तत्सदृशोहइत्यत्रेत्यर्थः।

४ मुख्यइति। नन्वयं देवदत्तो न्य एव नवत्तु तमस्त्वास्तावदयमित्येवक्ष्यो गोमुख्यःप्रवृत्ते तेच उत्तःहोणेत्येवास्तु विनिगम
काभावादिति चेन्न। अयं पटइतद्यटस इवाइति प्रयोगाघापत्तेर्नेदस्यावच्छेदकचेत्तेनैवलक्षणाय्यानाप्ययत्त्वादिति भावः।
शाबरमतमाह। स्यादेतदिति। गोसदृशो गवय इति वाक्यश्रवणजन्यं वा ज्ञानं करणं तदुत्तरोत्पन्नं गवयसदृशो गौरिति ज्ञा
नं फलमुपमितिरित्यर्थः। नानुमानमित्यत्र फलत्वेन स्मरणमेतत्सादृश्याननुभूतमननुभवादित्यपि द्रष्टव्यं। न
चैतदसिद्धमित्यत आह। किंचेति। एतज्ज्ञानमपि न जन्यतीत्याह। गवयगतेति। विशेषणासंनिकर्षेणासिद्धेः सत्य
दृ प्पा मेवदृष्टांतासिद्धिमाह। गवयांतरेति। स्वमतमाशयोपि तिं दूषयितुंचापरमतेनदूषयति। किंचेति। प्रत्यक्षादेवेति। चक्षुःसंनिकृष्टेति।
शेषः। सादृश्यं तु नैवमिति भावः। यद्यपि वैधर्म्यमप्युपमानं वक्ष्यति तथापि गत्यंतरमप्यस्तीत्येवमुक्तमित्यवधेयं। अयमिति।
सादृश्यप्रत्यनंतरं तादृशवैधर्म्ये चेति पूरणीयं। तेन वैधर्म्ये चत्यग्रिममनिधरनं संगच्छते सामान्यलक्षणाप्यासत्त्यादि
4 वतिशेषः। ननु सादृश्यज्ञानार्थं विशेषणसंनिकर्षानुसंधेयः प्रकृते चेतन [illegible] विनापि सादृश्यज्ञानमिति विशेषणसंनि ४
कर्षेणाविवनक्षतिरित्याह। अप्यगवयेति। नन्वेवं गवयपिंगवत्सादृश्यं स्यादित्यत आह। यद्वेति। तथाचायानि ५
रूपनेदननेदान्तोक्तदोषः। यद्यपि शृंगित्वादिविगतत्वेन सादृश्यं किं तु गवयगतशृंगित्वादिवत् तथापि सादृश्यमिति
नावच्छन्नो निर्देशाइतिसंगतिः। अयंसइति। यथासोयमित्यत्र तत्ताविशिष्टइदंतावैशिष्ट्यं प्रत्यक्षेणागम्यते अयं
सइत्यत्रेदंताविशिष्ट्यं प्रत्यक्षेणैवगम्यते तत्तायाइदंतानतिरेकाच्चेवलसंस्कारज्ञानेतदुपश्रयोगस्तथापि गवा

देरेकदेशेपिगवयगतत्वे गोसादृश्यत्वेनगोगतत्वात् गवयसादृश्यत्वेनप्रयोगो नत्वत्रमानांतरापेक्षा इत्यर्थः॥ वैधर्म्यव
दसंग्रहायाह। एवं चेति। अन्यथा अन्यथासिद्धिवारणायाह। प्रत्यक्षादिकं विनेति। पूर्वेषां ज्ञानानामुपमानता तदुत्तरोत्त
रज्ञानानामुपमितित्वमित्यर्थः॥ पूर्वेषामुपमानतेतिपाठे पूर्वेषामाचार्याणामुपमे[illegible]प्रमितिर्यतस्तत्करणमुपमानमि
त्याशयः॥ ननु गवयगतसादृश्यप्रतियोगित्वं गोर्नइत्यदृग्गम्यगम्यं विशेष्यासंनिकर्षात् नानुमानेगम्यं अनवस्था
नादित्यत आह। गवयगतेति। ननु गोर्विशेष्यत्वात् कथं तदसंनिकर्षेणात् तल्लिंगज्ञानमत आह। साहचर्य इति। अ
न्यथाप्रतियोगित्वेनानन्वये अत्रव्याप्तिग्रहं विनैव तादृशाधीरक्तत्रोपमानं स्यादित्यत आह। यत्र तद्धौ। सामान्यतद्वति।
नन्वेवमप्यनुमानं नस्याद्धूमत्वादिवदनुगतस्य व्याप्यतावच्छेदकस्याभावे नान्वयव्यतिरेकेनावाद न्वयिनो
भावात् व्यतिरेकी चाष्टोपाधिरेवेत्यत आह। प्रत्यक्षामिति। अन्यदेवेति। उजन यथा। पिनोपमानमित्यर्थः॥ गोसदृ
शोगवयपदं तिज्ञानानंतरं गवयसदृशोगोरितिगोविशेष्यकं मानसंज्ञानमिति नोपमानमित्यपिद्रष्टव्यं। जयंतादि
मातमाह॥ कीदृग्गवय इति। सदीति। प्रमाजननेपरस्परसहकारित्वमित्यर्थः। फलेति। यच्च पिनापितया। समाहार
इत्यपक्रमाद्वफलसमाहारविकल्पेनानवेत्तरति। तथापि [illegible] नस्तोवावाक्यस्यद्वयोः समाहार इति विकल्प
र्थः॥ फलानेकत्वान्निकालफलं च इत्यर्थः॥ ननुमृतस्य कालेसत्तवाक्यनसहकार। स्यादित्यत आह। वाक्येति।

व्यापारं विना न शाब्दस्यापि करणत्वमिति तदर्थस्मरणमप्युन्यस्तं वाक्यतदर्थस्मरणपदतदर्थस्मरणमप्यस्तीति तत्रै
व तात्पर्यं। पदस्य करणत्वात् तदर्थस्मरणस्यैव व्यापारत्वादिति। तद्गतेति। गोसादृश्यज्ञाने सत्यपीन्द्रियव्यापारसमयपरि
च्छेदात्साक्षात्सादृश्यज्ञानावच्छेदकत्वेन तदवच्छेदकारणमात्रं न तत इन्द्रियेण। इन्द्रियं तु धर्मिग्राहकत्वान्यथासिद्धमत एव शाब्द
कल्पनीतोपि पिंडे कचिद्वाच्यतापरिच्छेदः। एवं शाब्देपि सादृश्यज्ञानए वोपदीयतां नाव॥ पदस्य पदार्थस्मृतिव्या
पारवच्चक्षुरादेरपि सादृश्यज्ञानं व्यापार इति तद्द्वारेणाक्षेन्द्रियकरणमिति व्यापारसमाहारएव फलसमाहारपदार्थस्मृ
त्यावसतिलिंगपरामर्शे इंद्रियव्यापार इति अनुमितिरपि तद्द्वारेंद्रियकरणिका स्यात्। एवं पदार्थस्मृतिः। पदज्ञान
व्यापारं पदं ज्ञानं च श्रोत्रजन्यमिति तद्द्वारा श्रोत्रजन्ये वाक्यार्थधीरस्यादित्यपकृष्यमाणपरिशेषापत्तिरित्यादि।
फलसमहारेवेति। तत्किमिति प्रत्यक्षफलस्य प्रत्यक्षप्रमाणवद्विनिवारणेव। तथा च सति निर्विकल्पकमप्रत्यक्षं
विन्नं तं स्यात्। सविकल्पकानुरोधेन च तस्य प्रत्यक्षत्वे तत्त्वे लिंगसादृश्यप्रत्यक्षेयोः कः प्रद्वेषः। इंद्रियानुविधानं चा
नुमित्यादिसाधारणमिति भावः। तच तद्वदिति। अनुमित्यादावपि इंद्रियानुविधानमपीत्यत उक्तं मसाधारणेति।
तथा चायं त्रेंद्रियसंनिकर्षस्यावच्छितिस्तत्र तत्फलस्यावांतरव्यापारतायत्र तु न तदवच्छित्तिस्तत्र तत्प्रमाण
त्वविरोधात्पर्यः। अनुध्यादेशयति। अस्तीति। तस्मिन्निति। तस्मिन्सादृश्यज्ञाने तस्य चक्षुः संयोगस्यानुपयोगात्। ५

ति

व्यभिचारेणेति शेषः॥ तमेवाह उपलब्धेति। कालांतरेपि चक्षुर्व्यापारोपरमेपीत्यर्थः। तथा च घटः क्वचित्सन्नपि चक्षु
र्व्यापारो न दृष्टः॥ एवं चातींद्रियेस्मिन्समयपरिच्छेदो न स्यादिति भावः॥ तदेवं जरन्मीमांसकनव्यमीमांसकशाबरस्वा
मिजयंतिप्रभृतिजरन्नैयायिकमतेषु दूषितेषु स्वयं सिद्धांतमाह॥ उच्यत इति॥ पंचधा तावद्वाच्यवाचकना
व व्यवस्था तथाहि निमित्तोपलक्षणमिति तत्र शृंगग्राहिकया चैत्यादिपदवत्। निर्निमित्तपदस्य तटस्थोपल
क्षितपरिभाषया आकाशादिपदवत्। निर्निमित्तमेवं तिन्तूत्यागनिर्वचनिकया पाठकादिपदवत्। विशेषवन्नि
मित्तनिमित्तसंगोवनिकया स्वर्गादिपदवत्। सनिमित्तं तटस्थोपलक्षणमेवंप्रकारिकया घटत्वादिपदवत्।
इति तत्र प्रथमं कल्पं दूषयति। न तावदिति। स्वनिमित्तं वाच्यं घटत्वादिवत् उपलक्षणं तु वाच्यं तावदि
र्तं। घनुपदेगोचवदित्यनयोर्भेदं। ननु बालादिशरीरस्य परिमाणभेदेन शरीरभेदे चित्रविचित्रत्वं जातिरस्ती
ति नानिमित्तत्वं विनेति घटत इत्यत आह। शारीरकत्ववादिनामिति। एकत्ववादे हेतुमाह भेदानन्त्यान्न तद्यति।
एघपदीदं इत्यत्र ज्ञानमुक्तरीत्या शरीरभेदसिद्धावप्रमाणं तथापि स्तनंधयस्य चैत्रादिसंज्ञा तत्र चैत्रादि
पदवादिति भावः॥ व्यक्तिविशेषस्य संकेतविषयस्य स्वरूपेणापस्थितिः शृंगग्राहिका द्वितीयं कल्पं दूषयति।
नापीति। अत एव गवयांतरेपि नावादेवत्यर्थः। तथा च निर्निमित्तत्वमपि नास्ति गवयत्वस्य निमित्तत्वादिति भावः।

६ सिं०उ० ५

6

तच्चमुपलक्षणमित्यत आह। उपलक्षणस्य चेति। यथाकाशपदे आकाशत्वं वा शक्तिमदिति नैतं तथैव तदपिस्या
दिति गवयत्वमवाच्यं स्यादित्यर्थः। तृतीयं पक्षं शङ्कते। नापीत्यादि नोपलक्षणमपीत्यर्थः तेन। तथा च यथात त्रो
पलक्षणेपि शक्तिस्तथात्र शातसहस्रेऽपीत्यर्थः। ननुपचिक्रियाविशेषणं नोपलक्षणमिति कथं नोपलक्षणे शक्तिः।
किंच। पाचकमिति वाच्यं। ननु पदं वाक्येन शक्तिः। तदा कुत्र हे पादाः। पाचकं उपर्यं चिरेवाहक तीरड त्य
योपपक:। पाकमनुरुः पुनः कर्त्रीवाच्यो नैकस्य विदित्यत आह। अथेति। पचिक्रियानुपहितद्रव्यस्य विवरणमप
चतीति। तथा चागत्या वाक्येपि शक्तिः। पदमितरपदवदिति भावः। नन्वेवमप्युपलक्षणे शक्तिर्नी सिद्ध्यत्यत
आह। अवच्छेदकतयेति। दूषयति। यागान्तावादिति। गवयपदइतिभावः। चतुर्थं पक्षं शङ्कते। नापीति। स्व
र्गपदं सुखविशेषवाचं तत्र च सुखत्वमेव न निमित्तमतिप्रसंगादिति दुःखसंभिन्नसुखत्वं संकुचितं यथा
निमित्तं यथा साहस्यमत्र न निमित्तमतिप्रसंगादिति महिषादिव्यावृत्तं गोसादृश्यं संकुचितं निमित्तमित्यर्थः। दु ६
ष्यति। तदनावादिति। तदेवं यदि गोसादृश्यं वृत्तिनिमित्तं यदि नवनचैवं किंतु लाघवात् गगनत्वमेवा वे
ब्न संकोचकं हत्यर्थः। पंचमं पक्षमुपसंहरति। अतहति। अन्यथा सादृश्यस्य निमित्तचान्यपगमे गौरवेणा
निमित्तस्य निमित्तीकृत्य रहणात् फलमानासंतच करणं चाप्रमाणं स्यादित्यर्थः। अत्र वृत्तिनिमित्तं विचारान्वय

तापरिच्छेदः ततश्च लाघवादवयवत्वं तत्र स्वर्गेत्त्वनुपस्थितमिति तदनुप।स्थितदुपास्थितयोगवयवत्वंनि
मित्तत्वन्न वयपदेश वयेवात्त मित्यपरिच्छेदापायोपमानांतरसंगीकरणीयमिति निर्गलितोर्थः। अत्र स्ववच्छि
पस्थितेरनुप।स्थितिमाशंकते। नचेति। तथा च तदुपस्थितार्थमुपमानं स्यादिति भावः॥ अन्योन्येति। व्युत्प
त्तोसत्यांगवयपदाज्ञवयत्वोपस्थितिस्तत्सत्यां व्युत्पत्त्यर्थः। गौरवादिति। गोसादृश्यंगुरूउपाधि
तयासखंडत्वात्त्।गवयत्वंतुजातिरित्यखंडत्वात्लाघवमित्यर्थः। अयं चावश्यकः। किमिदं निमित्तमित्यत्तश्चा
ह निमित्तस्येति। नहि गोसादृश्यं तन्निमित्तं यम चरगतं गोरज्ञानादित्यर्थः। नचेति। वेदे नतु प्राकृस्वा
र्थोनवोधितइतिभावपर्यवसितमिति। नचपुनर्नेतिनबोधःशाब्दबुद्धिकर्मणां विरमव्यापाराज्ञावादित्य
तिभावः। अन्यथेति। साक्षात्तात्पर्यं विना पिलक्षणायामित्यर्थः। किंवेति। प्रकृतरचनात्वसावप त्तेरितिन
लेणेतिभावः। ननुत्तवेदवंपदिगकरणादेरवश्यज्ञानं नवेदित्यत आह। तात्पर्येति। नन्वेवमपि नाप
मानंस्यात्सामान्यतोदृष्टादनुमानादेव तात्पर्यसिद्धेरस्युपसंहरन्निरस्यति। तस्मादिति। वैशेषिकः शंकते।
आस्थितेति। अनुमानं प्रागवद्दूषितमिति कथमेतदित्यत आह तथा हीति। अन्नगवयगवीति अत्रासाध्यविकल

७ दृष्टांतः। यद्दर्शने वह्न्यंतरेप्यनुमिथेः प्रयुज्यते तत्तस्य वाचकमिति सामान्यव्याप्तोदृष्टांतीयमिति भावः। दोषां
7 तरमाह। नचेति। शाक्यसंबंधलक्षणा सा च तज्ज्ञानाधीनज्ञानेति तद्व्यतिरेकज्ञानमपि तदधीनमित्यर्थः।
ननु वाच्यतासामानाधिकरण्यादेव गवयत्वस्य प्रवृत्तिनिमित्तत्वं सेत्स्यतीति प्रथमदोषोद्धारमात्रं कथमित्यत
समानाधिकरमात्रस्येति। साध्यप्रसिद्धासत्यामाह। नकस्येति। ननु विपर्ययपर्यवसन्न एव तर्को वाच्यो
पपाद्यमूलत्वेऽपि व्याप्यमिति विपर्ययानुमानमेव तर्कसन्नानामेव प्रमाणसहकारित्वादिति तर्कयिष्ट
न्यमनुपमानमेव वाच्यमिति भावः। अथेति। पदत्वादिति हेतुः। बुद्धावपीत्यभ्युपगमवादः। न हि लाघवस
हित्यमनेककल्पितत्वं प्रकारिकातद्विरो विषयेवेति। अनुगमेति। अन्यथा बाधकविदाशितेति सामान्य
तो दृष्टादेव फलसिद्धौ आत्मसाधकव्यतिरेकि विलयापत्तेरिति भावः। फलमुखेन कल्पप्रमाण
पि लाघवगौरवस्यादोषत्वं सुगमत्वादुपेक्ष्याह। इच्छायामिति। तर्केति। सामान्यतो दृष्टस्य तर्कानवतारेपि ह्
ष्टपरिच्छेदकत्वं प्रवृत्तिनिमित्तपरिच्छेदस्य — [illegible] तयेति बाधिन्नमानसिद्धिरित्यर्थः। पदाएकैकबाधकस्य तर्के ७
नवतारेपि अदृष्टद्रव्यानाश्रयत्वपरिच्छेदकत्वं सामान्यतो दृष्टस्य तर्कसाहित्येनादृष्टद्रव्याश्रयत्वपरिच्छेद
कत्वमिति गौरवासामान्यतो दृष्टं तत्र स्यार्थः। तस्य तदपरिच्छेदकत्वादिति पाठे तस्य सामान्यतो दृष्टस्य तदपरिच्छेदकत्वात्॥

अष्टद्रव्यानाश्रयव्यापरिच्छेदकत्वादित्यर्थः॥ एवं चेतराप्रवृत्तिनिमित्तकत्वं न केवलेनतर्केण निश्चयं केवलत्व
स्य निश्चायकप्रवृत्तिनिमित्तमितराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वात्। यन्नैवं तन्नैवमिति ना
स्ति तत्। तथा गवयपदं गवयत्वप्रवृत्तिनिमित्तमिति ज्ञानमुपमानादेव तत्सहकारी च तर्क इति निगलि
तार्थः। नचेति। तथा चानुमानेनैवान्यथासिद्धिरित्यर्थः। यद्यपि गवयपदं गवयत्वप्रवृत्तिनिमित्तकमिति
ज्ञानमुपमानादेवमपीति व्यर्थमिदं तथापि गत्यंतरमिति दुष्यतामित्यत उक्तमिति तात्पर्यं॥ किंचेति। यो ग
वयपदवाच्यो मयावगतः स कीदृगिति तथा च गवयपदवाच्यत्वस्येव यद्योगसाध्यस्यान्यस्य प्रश्नवत्तद
वसाध्यमिति किं व्याप्तिपरत्वेनेत्यर्थः। ननु प्रमाणावसरे किं ‾ ‾ ण प्रश्नेनेत्यत आह। एवं चेति। अव्यव
हारः सर्वस्य कस्य विधा आद्यदृष्टांतासिद्धिः। सर्वव्यवहारस्यानवधारणे न दृष्टांते व्याप्तिविकलत्वा
दित्यर्थः। अंते व्यभिचार॥ गवयांतरेपि कतिपयाव्यवहारस्य साध्याभावस्य व्याप्यस्य सत्वेन सादृश्या
नावादित्यर्थः। इदं स्यादिति। सामान्यमुखमिति। दृष्टव्यक्तेरस्वरूपमादर्शनमिति। वाद्यज्ञस्यानुभवः
करणं वाक्यार्थस्मरणं व्यापारः। गवयत्वेन निमित्तेन गवयपदं गवयवाचकमिति मतिः फलं। तर्कः सहका
रीति प्रतिपादयितुं किंचिदाचष्टे। पश्चादिति। व्यतिरेक्यंतरं शंकते। अथेति। अस्त्विति। इतराप्रवृत्तिनि

८ निमित्तकत्वेसतिप्रवृत्तिनिमित्तकत्वानुमानात्तत्सामान्यतोदृष्टाद्वाशंकितंशाक्याद्यदानींतुगवयत्वनिमित्तकत्वंशंक्य
तइत्यपौनरुक्त्यं।कार्यत्वेति।इत्थाकचिदाश्रिता।कार्यत्वादित्यत्रकार्यत्वंकचिदाश्रितत्वबाधेनैवनतार्थ्यमि
त्यतिरिक्ताश्रयत्वबाधनायव्यतिरेकीत्यर्थः।नन्वेवमिहापिबाधकानंतपमानमुदियादित्यतआह।यत्रप
त ति।अत्रत्वतद्धदेवश्रयमंबाधकावतारइतिनतदुपइत्याशयः।कथमसिद्धिरित्यतआह।इत्युक्तत्वादिति।
अनुमितौव्यापकतावच्छेदकप्रकारकत्वनियमादित्युक्तंस्मारितमित्यर्थः।व्यवहाराद्वाघाव्युत्पत्तिः।सत्त्वर
त्ताविवानयनादिरूपइतिगोत्वादिनिमित्तकवाव्युत्पत्त्यशक्तिग्रहएवोपमानमित्यंगीकरणीयमिति।कथं
चिन्मतमाह।अत्रेति।तेननिमित्तेनगोत्वादिनाप्रतिबंध्यादिपाठेतेनप्रवृत्तिविषयेनेत्यर्थः।अत्रव्यक्तिज्ञानं
करणंजातिनिमित्तत्वज्ञानंफलमितिव्यक्तिधानंत्वेव्यभिचाराज्ज्यांज्ञातेरग्रहादेर्मस्यावच्छेदकस्यावत्वय
कत्वेनलाघवाद्गोत्वादेवरेतथात्वमितितदादायैवशक्तिग्रहइतिशक्तिग्राहकमेवगोत्वादिनिमित्त
नामप्रिग्राह्यतिनत्वन्यदित्याह।वार्त्तीति।अवच्छेदकत्वमेवनिमित्तत्वमितिनावः।कत्तुरेकतामिति ८
अवधारयतीत्यन्वयः।लाघवसहितमितिशेषः।अत्रशंकते।अथेति।बाधकेनेत्यनाकलय्याहरति
ग्रक्तस्मरणेनपरिहरति।नचेति।उपमीयतेनेनेत्युपमितिरूपमानमुपचारेणवातेदवव्यक्तौशक्तिग्रहतयापर

नामव्युत्पत्तिरिति व्यक्तौ शक्तिग्रहस्य एव करणनिमित्तत्वं परिच्छेदः फलमित्यंगीकरणमित्यर्थः। अन्यथेति। न चान्य
व्युत्पत्तिरित्यर्थः। व्युत्पत्तिरिति। योग्यताज्ञानादिवारणाय विशेष्यति। ननु सामान्यबोधे हेतुरित्यदोषः। प्र
करणादिना ज्ञानं च व्यभिचारान्न हेतुः। न हि गोजनप्रकरणे सैंधवपदार्थो न बुध्यत इत्यर्थः। अन्यथावि
ति। अन्यत्र ज्ञानं करणं अन्यत्र व्यवहारः फलमिति भावः। उपलक्षणेन शाब्दाश्रयेनेत्यर्थः। अन्यथेति
कुत्र कारान्न अनुपगमेमानां तेरेपि उपमानेति। नहीति। तथापि पिपटमदादिष्वनेकेषु घटादिपदशक्तिग्र
हानंतरं पटपदार्थ्यं घं तेरेषु व्यवहार इत्यनुपगंतुः। शक्तिग्रहेकाग तिरित्यर्थः। तथा पदार्थः तथा च पदार्थ
कदज्ञानवत्वान्वयबोधस्यैवमुपमानमंगीकरणीयमित्यर्थः। ननु साहश्यप्रमाकरणत्वं प्रवृत्तिनिमित्त
परिच्छेदकरणं वा वे धर्म्याव्यापकप्रतीयमानेनाप्रतीयमानज्ञानत्वमनुमानमिति भवति। ननु जातिव्यं
जकं ज्ञानाधीनज्ञानाव्यंजकत्वं वात्रानुगतमपि संभवति तीत्याव त्र्यपकर्षैत्तदे वलक्षणमास्तामित्या
शयेनाह। यद्वेति। निष्पतोधर्मः सादृश्यं तत्सामानाधिकरण्येन प्रवृत्तिनिमित्तत्वेन वदानमित्यर्थः। नन्व
न्योतरसादृश्यसामानाधिकरण्येन प्रवृत्तिनिमित्तत्वेन वैधर्म्य ज्ञानस्य ज्ञानमुपमितिः स्यादित्यत आह।।
प्रकारतयेति। व्यक्त्यास्त्वोरति व्याश्रयप्रकारतयेति। शाब्दाश्रयत्वादिवारणायाह। शाब्दशक्तिग्रहविषयत्व

५

मिति। ननु पटसादृश्यसमानाधिकरण्यं घटपदप्रवृत्तिनिमित्तं घटत्वमिति ज्ञानेऽतिव्याप्तिः। नच वाक्य
पदेन गोसदृशो गवय इत्याद्युक्तिदशायां वाक्यं विवक्षितं समानाधिकरण्यं तद्विशेष्यापत्तेः। किंच नियत
नै५ तधर्मपदेन सादृश्यपात्तिधाने वैधर्म्याद्यव्याप्तिः। न चानन्वयमपि विवक्षितं तदुन्नयमानोपपद्यत कालादि
त्वानुत्रायेनाचार्यलक्षणमाह॥ अगृहीतेति। घटज्ञानं गृहीतसंगतिरित्यदोषः। वाक्यार्थसाधर्म्यवैध
र्म्यान्वयमित्यदोषः। प्रसिद्धपदसामानाधिकरण्येन तु वाक्यार्थसामानाधिकरण्ये न ज्ञानमनवगतेति
ऽतिपिपदार्थघटितं न चादित्यदोषः। अनुक्त्वाप्युपमानं च मानमाहुस्तन्मतेनाह। केचिदिति। एतन्म
१ मतेऽपदर्शनमात्रं तात्पर्यमाचार्यलक्षणे वेति द्रष्टव्यं। ननु यत्र कीदृग्गवय इति प्रश्नः गोसदृशो गवय
इत्युत्तरं तत्रोपमानं न स्यात् सादृश्यवैसादृश्ययोरनावृतत्वात्। न चेष्टापत्तिः संज्ञासंज्ञिपरिच्छेदनावापरवैरित्य ८
त आह। अत्यंतसादृश्यलानायावेति निषेधोक्तः तदुक्तं घोषापत्ति निषेधे सातिचायं प्रकृतमर्थं गम्यती
ति। परंपरया निषेधद्वयद्वारेत्यर्थः॥ छ॥ इति महामहोपाध्यायश्रीमत्पक्षधरकृत उपमानविवेकः संपूर्णः॥

३००